# केन्द्रीयसंस्कृतविश्वविद्यालयः

संसदः अधिनियमेन स्थापितः

( पूर्व राष्ट्रियसंस्कृतसंस्थानम्, मानितविश्वविद्यालयः )

भारतसर्वकारस्य शिक्षामन्त्रालयाधीनः

56-57, सांस्थानिकक्षेत्रम्

जनकपुरी, नवदेहली-110058


## संस्कृतशिक्षायाः विकासयोजनायाः अन्तर्गततया 2020-21 वर्षे मेधावीछात्रवृत्तिप्रदानाय संस्कृत-पाठशालासु/ संस्कृत-महाविद्यालयेषु/संस्कृत-विश्वविद्यालयेषु एवम् माध्यमिक/माध्यमिकोन्नत-विद्यालयेषु/कलाशालासु/विश्वविद्यालयेषु अध्ययनरतेभ्यः छात्रेभ्यः ऑनलाईन् माध्यमेन आवेदनार्थं सूचना

संस्कृतभाषायाः प्रचारप्रसाराय भारतसर्वकारस्य शिक्षामन्त्रालयस्य अधीनस्थः केन्द्रीयसंस्कृतविश्वविद्यालयः, देहली संस्कृतशिक्षायाः विकासयोजनायाः अन्तर्गततया छात्रेभ्यः मेधावीछात्रवृत्तिं प्रददाति। एतदुपलक्ष्य परम्परागतधारायां मान्यताप्राप्तेषु संस्कृतविद्यालयेषु/संस्कृतमहाविद्यालयेषु/संस्कृतविश्वविद्यालयेषु तथा आधुनिकधारायां मान्यताप्राप्तेषु माध्यमिकविद्यालयेषु/महाविद्यालयेषु/ विश्वविद्यालयेषु च पूर्वमध्यमा(प्रथमवर्षम्)/नवमकक्षा, पूर्वमध्यमा(द्वितीयवर्षम्)/दशमकक्षा, उत्तरमध्यमा/प्राक्शास्त्री-(प्रथमवर्षम्)/ एकादशकक्षा, उत्तरमध्यमा/प्राक्शास्त्री-(द्वितीयवर्षम्)/द्वादशकक्षा, शास्त्री/बी.ए.(प्रथम/द्वितीय/तृतीय-वर्षम्), आचार्यः/एम.ए.(प्रथम/द्वितीय-वर्षम्) तथा विद्यावारिधिः/पी.एचडी. पाठ्यक्रमेषु अथवा तत्तत्समपाठ्यक्रमेषु च संस्कृत/पालि/प्राकृत-भाषां मुख्यविषयरूपेण अथवा ऐच्छिकविषयरूपेण स्वीकृत्य नियमिताध्ययनरतानां-छात्राणां कृते मेधावीछात्रवृत्तेः प्रदानाय ऑनलाईन-माध्यमेन आवेदनपत्रम् आमन्त्रयते।

- **छात्रवृत्तिप्रदानाय आवेदनपत्रं केवलम् ऑनलाईनद्वारा एव स्वीक्रियते। आवेदनपत्रम् अथवा प्रमाणपत्राणि पत्राचारमाध्यमेन अन्यमाध्यमेन वा विश्वविद्यालयं प्रति प्रेषणस्य आवश्यकता नास्ति।**
- **छात्रवृत्तेः निमित्तम् ऑनलाईनद्वारा संस्थानां पञ्जीकरणार्थं/संस्थानां विवरणं परिष्कर्तुं/छात्रैः आवेदनं कर्तुम् अपेक्षितनिर्धारिततिथयः -**

| सोपानम् | विस्तृतसूचना | निर्धारिततिथयः | |
|---|---|---|---|
| **1. सोपानम्** (Step-I) | सर्वा अपि शैक्षिकसंस्थाः ऑनलाईन् माध्यमेन पञ्जीकरणं कुर्युः अथवा संस्थायाः विवरणं परिष्कुर्युः - | पञ्जीकरणार्थम्/परिष्करणार्थम् आरम्भतिथिः 20.12.2020 | पञ्जीकरणार्थम्/परिष्करणार्थम् अन्तिमतिथिः 28.03.2021 |
| **2 सोपानम्** (Step-II) | सम्बद्धसंस्थायाः नाम छात्राणां ऑनलाईन-आवेदनपत्रे प्रदर्शनात् परं छात्रः छात्रवृत्त्यर्थम् ऑनलाईन् द्वारा आवेदनं कर्तुं शक्नोति। | छात्रवृत्तेः आवेदनार्थम् आरम्भतिथिः 20.12.2020 | छात्रवृत्तेः आवेदनार्थम् अन्तिमतिथिः 31.03.2021 |

- छात्रवृत्यर्थं संस्थायां पंजीकरणार्थं अथवा छात्रैः आवेदनार्थम् अर्हता, नियमाः, आवश्यकप्रमाणपत्राणि इत्यादीनां विस्तृतविवरणार्थं विश्वविद्यालयस्य **www.sanskrit.nic.in** अथवा **www.scholarship.csu.co.in** इति अन्तर्जालसङ्केतम् अवलोकयन्तु।

**कुलसचिवः**